ॐ

# श्री त्रिपुरसुन्दरी चक्रराजस्तवं

śrī tripurasundarī cakrarājastavaṁ

१ कर्तुं देवि जगद्विलासविधिना सृष्टेन ते मायया

"सर्व्वानन्दमयेन" मद्ध्यविलसच्छरी "बिन्दु" नालंकृतं

श्रीमत्सद्गुरु पूज्यपादकरुणा संवेद्यतत्वात्मकं

श्रीचक्रं शरणं व्रजामि सततं सर्व्वेष्ठसिद्धिप्रदं॥

1 kartuṁ devi jagadvilāsavidhinā sṛṣṭena te māyayā
"sarvvānandamayena" maddhyavilasaccharī "bindu" nālaṁkṛtaṁ
śrīmatsadguru pūjyapādakaruṇā saṁvedyatatvātmakaṁ
śrīcakraṁ śaraṇaṁ vrajāmi satataṁ sarvveṣṭhasiddhipradaṁ ||

२ एकस्मि "न्नणिमाति" भिर्विलसितं "भूमिगृहे" सिद्धिभिर्

"ब्राह्म्याद्य" भिरुपाश्रितं च दशभिर्मुद्राभिरुद्भासितं

चक्रेश्या "प्रकटेड्या" त्रिपुरया "त्रैलोक्यसम्मोहनं"

श्रीचक्रं शरणं व्रजामि सततं सर्व्वेष्ठसिद्धिप्रदं॥

2 ekasmi "nnaṇimāti" bhirvilasitaṁ "bhūmigṛhe" siddhibhir
"brāhmyādya" bhirupāśritaṁ ca daśabhirmudrābhirudbhāsitaṁ
cakreśyā "prakaṭeḍyā" tripurayā "trailokyasammohanaṁ"
śrīcakraṁ śaraṇaṁ vrajāmi satataṁ sarvveṣṭhasiddhipradaṁ ||

३ ईड्याभिर् नवविद्रुमच्छविसमाख्याभिरंगीकृतं

"कामाकर्षणिकादिभिः" स्वरदळे "गुप्ता" भिधाभिःसदा

"सर्व्वाशापरिपूरके" परिलसद्देव्या पुरेश्यायुतं

श्रीचक्रं शरणं व्रजामि सततं सर्व्वेष्ठसिद्धिप्रदं॥

3 īḍyābhir navavidrumacchavisamākhyābhiraṁgīkṛtaṁ

ॐ

"kāmākarṣaṇikādibhiḥ" svaradaḻe "guptā" bhidhābhiḥsadā
"sarvvāśāparipūrake" parilasaddevyā pureśyāyutaṁ
śrīcakraṁ śaraṇaṁ vrajāmi satataṁ sarvveṣṭasiddhipradaṁ ||

४ लब्ध प्रोज्वलयौव्वनाभिरभितोऽ"नंगप्रसूनारिभिः"

सेव्यं "गुप्ततराभि" रष्टकमले "संक्षोभका" ख्ये सदा

चक्रेश्या पुरसुन्दरीति जगति प्रख्यातया संगतं

श्रीचक्रं शरणं व्रजामि सततं सर्व्वेष्टसिद्धिप्रदं॥

4 labdha projvalayauvvanābhirabhito'"naṁgaprasūnāribhiḥ"
sevyaṁ "guptatarābhi" raṣṭakamale "saṁkṣobhakā" khye sadā
cakreśyā purasundarīti jagati prakhyātayā saṁgataṁ
śrīcakraṁ śaraṇaṁ vrajāmi satataṁ sarvveṣṭasiddhipradaṁ ||

५ ह्रींकाराङ्कितमन्त्रराजनिलयं श्री "सर्व्वसंक्षोभिणी"

मुख्याभिश्चलकुन्तळाभिरुषितं "मन्वश्चक्रे" शुभे

यत्र श्री पुरवासिनी विजयते श्री " सर्व्वसौभाग्यदे"

श्रीचक्रं शरणं व्रजामि सततं सर्व्वेष्टसिद्धिप्रदं॥

5 hrīṁkārāṅkitamantrarājanilayaṁ śrī "sarvvasaṁkṣobhiṇī"
mukhyābhiścalakuntaḻābhiruṣitaṁ "manvaścakre" śubhe
yatra śrī puravāsinī vijayate śrī " sarvvasaubhāgyade"
śrīcakraṁ śaraṇaṁ vrajāmi satataṁ sarvveṣṭasiddhipradaṁ ||

६ हस्तेपाशगदादिशस्त्रनिचयं दीप्तं वहन्ती भि रुत -

तीर्णाख्यारुभिरुपास्यताऽतिशुभते " सर्व्वार्त्थसिद्धिप्रदे"

चक्रे "बाह्यदशारके" विलसितं देव्या पुरश्र्याख्यया

श्रीचक्रं शरणं व्रजांइ सततं सर्व्वेष्टसिद्धिप्रदं॥

6 hastepāśagadādiśastranicayaṁ dīptaṁ vahantī bhi ruta -
tīrṇākhyārubhirupāsyatā'tiśubhate " sarvvārtthasiddhiprade"
cakre "bāhyadaśārake" vilasitaṁ devyā puraśryākhyayā

ॐ

śrīcakraṁ śaraṇaṁ vrajāṁi satataṁ sarvveṣṭasiddhipradaṁ ||

७ सर्व्वज्ञा "दिभिरिन्दुकान्तिधवळा"काराभिरारक्षिते

चक्रे"ऽन्तर्दशकोणकेऽति " विमले नाम्ना च "रक्षाकरे"

यत्र श्रीपुरमालिनी विजयते नित्यं "निगर्भा" स्तुता

श्रीचक्रं शरणं वज्रामि सततं सर्व्वेष्टसिद्धिप्रदं॥

7 sarvvajñā "dibhirindukāntidhavaḻā"kārābhirārakṣite
cakre"'ntardaśakoṇake'ti " vimale nāmnā ca "rakṣākare"
yatra śrīpuramālinī vijayate nityaṁ "nigarbhā" stutā
śrīcakraṁ śaraṇaṁ vajrāmi satataṁ sarvveṣṭasiddhipradaṁ ||

८ कर्तुं मूकमनर्ग्गळस्रवदति द्राक्षादिवाग्वैभवं

रक्षाभिर्"वशनी" मुखाभिरभितो वाग्देवताभिर्युतं

"अष्टारे" पुरसिद्धया विलसितं "रोगप्रणाशे" शुभे

श्रीचक्रं शरणं प्रजामि सततं सर्व्वेष्टसिद्धिप्रदं॥

8 kartuṁ mūkamanarggaḻasravadati drākṣādivāgvaibhavaṁ
rakṣābhir"vaśanī" mukhābhirabhito vāgdevatābhiryutaṁ
"aṣṭāre" purasiddhayā vilasitaṁ "rogapraṇāśe" śubhe
śrīcakraṁ śaraṇaṁ prajāmi satataṁ sarvveṣṭasiddhipradaṁ ||

९ हन्तुं दानवसंघमाहवभुवि स्वेच्छासमाकल्पितैः

शस्त्रैरस्त्रचयैश्च चापनिवहैरत्युग्रतेजोभरै

आर्त्तत्राणपरायणैररिकुलप्रद्ध्वंसिभिःसंवृतं

श्रीचक्रं शरणं व्रजामि सततं सर्व्वेष्टसिद्धिप्रदं॥

9 hantuṁ dānavasaṁghamāhavabhuvi svecchāsamākalpitaiḥ
śastrairastrracayaiśca cāpanivahairatyugratejobharai
ārttatrāṇaparāyaṇairarikulapraddhvaṁsibhiḥsaṁvṛtaṁ
śrīcakraṁ śaraṇaṁ vrajāmi satataṁ sarvveṣṭasiddhipradaṁ ||

ॐ

१० लक्ष्मीवागगजात्माभिः करतलसत्पाशासिघण्डभिदिः

"कामेश्यादिभिरावृतं""शुभकरं""श्रीसर्व्वसिद्धिप्रदं"

चक्रेश्वरी च पुरांबिका विजयते यत्र त्रिकोणेमुदा

श्रीचक्रं शरणं व्रजामि सततं सर्व्वेष्टसिद्धिप्रदं॥

10 lakṣmīvāgagajātmābhiḥ karatalasatpāśāsighaṇḍabhidiḥ
"kāmeśyādibhirāvṛtaṁ""śubhakaraṁ""śrīsarvvasiddhipradaṁ"
cakreśvarī ca purāṁbikā vijayate yatra trikoṇemudā
śrīcakraṁ śaraṇaṁ vrajāmi satataṁ sarvveṣṭasiddhipradaṁ ||

११ ह्रींकारं परमं जपद्भिरमिशं मित्रेशनाथादिभिर्-

दिव्यौघैर्मनुजौघसिर्द्धनिवहैः सारूप्यमुक्तिं गतैः

नानामन्त्रहस्यविद्भिरखिलैरन्वासितं योगिभिः

श्रीचक्रं शरणं व्रजामि सततं सर्व्वेष्टसिद्धिप्रदं॥

11 hrīṁkāraṁ paramaṁ japadbhiramiśaṁ mitreśanāthādibhir-
divyaughairmanujaughasirddhanivahaiḥ sārūpyamuktiṁ gataiḥ
nānāmantrahasyavidbhirakhilairanvāsitaṁ yogibhiḥ
śrīcakraṁ śaraṇaṁ vrajāmi satataṁ sarvveṣṭasiddhipradaṁ ||

१२ सर्वोत्कृष्टवपुर्धराभिरभितो देवीसमाभिर्जगत्-

सम्रक्षार्त्थमुपागताभिरसकृन्नित्याभिधाभिर् मुदा

कामेश्यादिभिराज्ञयैव ललितादेव्याः समुद्भासितं

श्रीचक्रं शरणं व्रजामि सततं सर्व्वेष्टसिद्धिप्रदं॥

12 sarvotkṛṣṭavapurdharābhirabhito devīsamābhirjagat-
samrakṣārtthamupāgatābhirasakṛnnityābhidhābhir mudā
kāmeśyādibhirājñayaiva laḻitādevyāḥ samudbhāsitaṁ
śrīcakraṁ śaraṇaṁ vrajāmi satataṁ sarvveṣṭasiddhipradaṁ ||

१३ कर्तुं श्रीललितांगरक्षणविधिं लावण्यपूर्णां तनू-

ॐ

मास्थायास्त्रवरोल्लसत् करपयोजाताभिरर्ध्यासितं

देवीभिर्हृदयादिभिश्च परितो बिन्दुं सदाऽनन्ददं

श्रीचक्रं शरणं व्रजामि सततं सर्व्वेष्टसिद्धिप्रदं॥

13 kartuṁ śrīlal̲itāṁgarakṣaṇavidhiṁ lāvaṇyapūrṇṇāṁ tanū-
māsthāyāstravarollasat karapayojātābhirarddhyāsitaṁ
devībhirhṛdayādibhiśca parito binduṁ sadā'nandadaṁ
śrīcakraṁ śaraṇaṁ vrajāmi satataṁ sarvveṣṭasiddhipradaṁ ||

१४ लक्ष्मीशादिपदैर्युतेन महता मन्चेन संशोभितं

षट्त्रिंशद्भरनर्घरत्नखचितैःसोपानकैर्भूषितं

चिन्तारत्नविनिर्मितेन महता सिंहासनेनोज्ज्वलं

श्रीचक्रं शरणं व्रजामि सततं सर्व्वेष्टसिद्धिप्रदं॥

14 lakṣmīśādipadaiyutena mahatā mancena saṁśobhitaṁ
ṣaṭtriṁśadbharanargharatnakhacitaiḥsopānakairbhūṣitaṁ
cintāratnavinirmitena mahatā siṁhāsanenojjvalaṁ
śrīcakraṁ śaraṇaṁ vrajāmi satataṁ sarvveṣṭasiddhipradaṁ ||

१५ ह्रींकारैकमहामनुं प्रजपता कामेश्वरेणेषितं

तस्याके च निषण्णया त्रिजगतां मात्रा चिदाकारया

कामेश्या करुणारसैकनिधिना कल्याणिदात्र्यायुतं

श्रीचक्रं शरणं व्रजामि सततं सर्व्वेष्टसिद्धिप्रदं॥

15 hrīṁkāraikamahāmanuṁ prajapatā kāmeśvareṇeṣitaṁ
tasyāke ca niṣaṇṇayā trijagatāṁ mātrā cidākārayā
kāmeśyā karuṇārasaikanidhinā kalyāṇidātryāyutaṁ
śrīcakraṁ śaraṇaṁ vrajāmi satataṁ sarvveṣṭasiddhipradaṁ ||

१६ श्रीमत् पञ्चदशाक्षरैक्यनिलयां श्रीषोडशी मन्दिरं

श्रीनातादिभिरर्च्चितं च बहुधा देवैःसमारिधीतं

ॐ

श्रीकामेशरहःसखिनिलयं श्रीमद्गगुहाराधितं

श्रीचक्रं शरणं व्रजामि सततं सर्व्वेष्टसिद्धिप्रदं ॥

16 śrīmat pañcadaśākṣaraikyanilayāṁ śrīṣoḍaśī mandiraṁ
śrīnātādibhirarccitaṁ ca bahudhā devaiḥsamāridhītaṁ
śrīkāmeśarahaḥsakhinilayaṁ śrīmadgaguhārādhitaṁ
śrīcakraṁ śaraṇaṁ vrajāmi satataṁ sarvveṣṭasiddhipradaṁ ||

॥ इति श्रीमतं त्रिपुरसुन्दरीचक्रराजस्तवः संपूर्ण्णः ॥

|| iti śrīmataṁ tripurasundarīcakrarājastavaḥ saṁpūrṇṇaḥ ||

Please send any corrections/suggestion on this document to menonar@yahoo.com